COMPILED AND CIRCULATED BY PROF. ASIS BHATTACHARYA
DEPARTMENT OF SANSKRIT, NARAJOLE RAJ COLLEGE

# सिद्धान्तकौमुदी :तिङन्तप्रकरणम्

**सूत्र**- स्वरितञितः कर्त्रभिप्राये क्रियाफले १।३।७२

अर्थः॥स्वरितेतः ञितः च धातुभ्यः आत्मनेपदं भवति, क्रियाफलं यदि कर्त्तारम् अभिप्रौति॥

स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले ॥

णेः इति निवृत्तम्। शेषात् कर्तरि परस्मैपदे प्रप्ते स्वरितेतो ये धातवो ञितश्च तेभ्यः आत्मनेपदं भवति, कर्तारं चेत् क्रियाफलम् अभिप्रैति। क्रियायाः फलं क्रियाफलं प्रधानभूतम्, यदर्थम् असौ क्रिया आरभ्यते तच् चेत् कर्तुर् लकारवाच्यस्य भवति। यजते। पचते। ञितः खल्वपि सुनुते। कुरुते। स्वर्गादि प्रधानफलम् इह कर्तारम् अभिप्रैति। कर्त्रभिप्राये इति किम्? यजन्ति याजकाः। पचन्ति पाचकाः। कुर्वन्ति कर्मकराः। यद्यपि दक्षिणा भृतिश्च कर्तुः फल्मिहास्ति तथा अपि न तदर्थः क्रियारम्भः।

कत्र्रभिप्राये" इति। कत्र्तारमभिप्रैतीति "कर्मण्यण्" ३।२।१। यदि सामान्येन यत्र क्रियाफलं कत्र्तारमभिप्रैति तत्रात्मनेपदम्, तदेहापि स्यात्-- पचन्ति पाचकाः, यजन्ति याजका इति। तथा ह्रत्र क्रियाफलं दक्षिणा याजकान् कर्त्तृनभिप्रैति, भृतिश्च पाचकानित्यत आह-- "क्रियायाः फलम्" इत्यादि। प्रधानभूतं यत्फलं क्रियायास्तदिह गृह्रते। न च दक्षिणादिकं क्रियाफलं प्रधानभूतम्, ततो न भवत्यतिप्रसङ्गः। किं पुनस्तत्प्रधानभूतमित्यत आह- "यदयर्थम्" इत्यादि। एतेन यदुद्दिश्यासौ यागादिक्रियारभ्यते, न तु दक्षिणाद्यर्थम्। "यदर्थम्" इति। स्वर्गादि, न तु दक्षिणादि। तथा हि स्वर्गाद्यर्थं यागादिक्रियारभ्यते, न तु दक्षिणाद्यर्थम्। "यदर्थम्" इति। क्रियाविशेषणमेतत्। यच्छब्देन क्रियायाः प्रधानभूतं फलं निर्दिश्यते। यदर्थः प्रयोजनं यस्य क्रियारम्भस्य फलमात्रस्य ग्रहमभिप्रेतं स्यात्, तदा फलग्रहणमनर्थकं स्यात्; व्यवच्छेद्याभावत्। नास्त्येव हि स विषयो यत्र क्रियाफलं कत्र्तारं नाभिप्रैति; ततश्च

कत्र्रभिप्राये क्रियाया इत्येदं ब्राउयात्। एवमप्युक्ते षष्ठआ क्रियायाः सम्बन्धिनि कत्र्रभिप्राये प्रत्यायिते सामथ्र्यात् फमलेव क्रियक्ष्आयाः कत्र्रभिप्रायं गम्यते। न हि फलान्यत् क्रियासम्बन्धि कत्र्तारमभिप्रैति। तस्मात् फलग्रहणसामथ्र्यात् प्रधानं फलं गृह्रते। अथ वा-- प्रधानत्वादेव प्रधानं फलं गृह्रते। तथा चोक्तम्-- प्रधाने कार्यसम्प्रत्ययात् सिद्धमिति। अस्मिन् व्याख्याने फलग्रहणं स्पष्टार्थम्, कर्तर्यात्मनेपदविधानात्। प्रत्यासत्तर्यस्तस्य वाच्यः कत्र्ता यदि तस्यैव तत् फलं भवतीति विज्ञायत इत्याह-- "तच्च" इत्यादि। गतार्थम्। "स्वर्गादि" इति। आदिशब्देनौदनादिकमपि गृह्रते।"तथापि"इत्यादिना दक्षिणादेः फलस्याप्रधान्यं दर्शयति।यदर्थं सा क्रियारभ्यते तत्प्रधानमिहोपात्तं फलम्। स्वर्गाद्यर्थं च यागादिक्रियाऽऽरभ्यते; न दक्षिणाद्यर्थम्। अतोऽप्रयोजकत्वात्तदप्रधाम्। तेन यद्यपि तत् कत्र्तारमभिप्रैति तथाप्यात्मनेपदं न भवति। अथाभिप्रग्रहणं किमर्थम्? विप्रकृष्टेऽपि फले यथा स्यात् द्विविधं हि क्रियाफलम्-- आसन्नम्, विप्रकृष्टञ्च। तत्रासन्नम्-- यस्य व्यापारानन्तरमेव निष्पत्तिः। विप्रकृष्टन्तु-- उपरतेषु व्यापारेषु यन्निमित्तान्तरमपेक्ष्यकालविप्रकर्षकृतंसंस्कारपरिपाकाच्चिराद्भवति।तत्राद्यमासन्नत्वा त्दृष्टत्वादुत्पतिंत प्रत्यव्यभिचाराच्च प्रधानमम्। इतरत् पुनर्विप्रकृष्टत्वादनुमेयत्वात् सम्भवव्यभिचाराच्चोत्पतिंत प्रति व्यभिचारः। यद्यपि तदुद्दिश्य क्रियारम्भात् तदपि प्रधानम्, तथाप्यविप्रकृष्टफलापेक्षया तस्याप्राधान्यमस्त्येव। तत्र यद्यभिप्रग्रहणं न क्रियेत, तदा लुनीत पुनीत इत्यादावेव स्यात्-- यत्राविप्रकृष्टं क्रियाफलम्। यजते इत्यादौ तु न स्यात्-- यत्र विप्रकृष्टं स्वर्गादिकं क्रियाफलम्, प्रधाने कार्यसम्प्रत्ययात्। अभिग्रहणे तु न दोषः; यस्मादभिराभिमुख्ये वत्र्तते, प्रशब्दसत्त्वारम्भे। तेन प्रारम्भमात्रस्याभिमुख्ये फलनिष्पत्तौ बुद्धावाश्रीयमाणायां सर्वत्र सिद्धं भवति। ननु चासत्यभिप्रग्रहणे प्रकृतीनां यजिप्रभृतीनामनुबन्धविशेषासञ्जनादेव विप्रकृष्टेऽपि फले भविष्यतिच अन्यथा हि तस्य वैयथ्र्यं स्यात्, न; अभिचारादौ यत्राविप्रकृष्टं फलं

दृष्टमस्ति तत्र तस्य सार्थकत्वात्। तस्माद्विप्रकृष्टेऽप्यप्रधाने फले स्यादित्येवमर्थमिप्रग्रहणं कत्र्तव्यमेव॥

स्वरितञितः। स्वरितश्च ञ् च स्वरितञौ, तौ इतौ यस्य तस्मादिति बहुव्रीहिः। इच्छब्दः प्रत्येकं सम्बध्यते। तदाह-- स्वरितेतो ञितश्चेति। धातोरित्यनन्तरं "लस्य स्थाने"इति शेषः। कर्तारमभिप्रैति गच्छतीति "कत्र्रभिप्रायम्"। कर्मण्यण्। तदाह-- कर्तृगामिनीति। एवं च "होता याज्यया यजती"त्यादौ यागफलस्य स्वर्गस्य यजमानगामित्वेन होतृगामित्वाऽभावान्नात्मनेपदम्। तथा "वेतनेन यज्ञदत्तभृतो देवदत्तः पचती"त्यत्रापि पाकफलस्य भोजनस्य पक्तृगामित्वाऽभावान्नात्मनेपदम्। दक्षिणादिलाभस्तु न फलम्। लोकतो वेदतो वा यदुद्देशेन क्रियाप्रवृत्तिस्तस्यैवात्र क्रियाफलशब्देन। विवक्षित्वात्। कर्तृगामिफलकक्रियावृत्तेर्धातोरित्यर्थः। आत्मनेपदं तु धात्वर्थफलस्य कर्तृगामित्वं द्योतयतीत्यलम्।

**सूत्र- युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १।४।१०५**

तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः स्यात् ॥

प्रहासः परिहासः क्रीडा। प्रहासे गम्यमाने मन्यौपपदे धातोर् मध्यमपुरुषो भवति, मन्यतेश्चौत्तमः, स च एकवद् भवति। एहि मन्ये ओदनम् भोक्ष्यसे इति, न हि भोक्ष्यसे, भुक्तः सो ऽतिथिभिः। एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यात्स्तेन ते पिता। मध्यमौत्तमयोः प्राप्तयोः उत्तममध्यमौ विधीयेते। प्रहासे इति किम्? एहि मन्यसे ओदनं भोक्ष्ये इति। सुष्ठु मन्यसे। साधु मन्यसे।

ठप्रहासे गम्यमाने" इति। यत्र भूतार्थाभावाद्वञ्चनैव केवलं तत्र वक्तुरभिप्रयाविष्करणेन प्रहासो गम्यते। "मन्योपपदे" इति।मन्यतिरुपपदमुपोच्चारितं पदं यस्य स तथोक्तः। मध्यमस्य धातोर्विधानात् धातुरन्यपाद्रथो विज्ञायत इत्याह-- "धातोःट इति। "स चैकवत्" इति। यत्र द्वौ मन्तारौ बहवो वा तत्रायमेकवद्भावो

विधीयते। अन्यत्र तु मन्तुरेकत्वादेवैकवचनं सिद्धम्। "मध्यमोत्तमयोः" इति। यथाक्रमं युष्मदस्मदोरुपपदयोः समानाधिकरणयोरप्रयुज्यमानयोरप्यर्थस्य विद्यमानत्वात्। यथा प्रत्युदाहरणे
पूर्वकमुपपदग्रहणंयुष्मच्छब्देनाभिसम्बद्धमिहानुवत्र्ततेतितन्मन्यतिनाऽशक्यमभि सम्बन्धुमिति पुनरुपपदग्रहणं क्रियते। मन्यतेरिति श्यना निर्देशः, इत्यस्य तानादिकस्य ग्रहणं मा भूदत्येवमर्थः। तेनेनह न भवति-- एहि मनुषे रथेन यास्यामि न हि यास्यसि यातस्तेन ते पितेति। एवं हि मनोतेर्भवति॥

प्रहासे च। वाक्यद्वयमिदं सूत्रम्। "प्रहासे च मन्योपपदे इति प्रथमं वाक्यम्। मध्यम इत्यनुवर्तते। मनधातुः श्यन्विकरण उपपदं यस्येति बहुव्रीहिः। मन्यपदश्रवणबलाद्धाताविति विशेष्यं लभ्यते। तदाह--मन्यधातुरित्यादिना। तस्मिन्प्रकृतिभूते सतीति। तस्माद्धातोर्लस्य स्थाने इत्यर्थः। मध्यमः स्यादिति। "अस्मद्युपपदे" इति शेषः। अस्मद्युत्तमं इत्युत्तरसूत्रात्तदनुवृत्तेः। एवं च उत्तमपुरुषापवादोऽयं मध्यमविधिः। "मन्यतेरुत्तम एकवच्चे"ति द्वितीयं वाक्यम्। तद्व्याचष्टे-- मन्यतेस्तूत्तमः स्यादिति। "युष्मद्युपपदे" इति शेषः। पूर्वसूत्रात्तदनुवृत्तेः। स चेति। सः = मन्येतरुत्तमपुरुषः,द्वित्वबहुत्वयोरपि एकवचनं लभत इत्यर्थः। मध्यमोत्तमयोव्र्यत्यासार्थमिदम्। एतत्सर्वमनुपदमेवोदाहरणे स्पष्टीभविष्यति।

वाक्यद्वयमिदं सूत्रम्। "प्रहासे च मन्योपपदे" इति प्रथमं वाक्यम्। मध्यम इत्यनुवर्तते।मनधातुःश्यन्विकरणउपपदं यस्येति बहुव्रीहिः। मन्यपदश्रवणबलाद्धाताविति विशेष्यंलभ्यते।तदाह--मन्यधातुरित्यादिना। तस्मिन्प्रकृतिभूते सतीति। तस्माद्धातोर्लस्य स्थानेइत्यर्थः।मध्यमःस्यादिति।"अस्मद्युपपदे"इतिशेषः।अस्मद्युत्तमंइत्युत्तरसूत्रात्तद नुवृत्तेः। एवं च उत्तमपुरुषापवादोऽयं मध्यमविधिः। "मन्यतेरुत्तम एकवच्चे"ति द्वितीयं वाक्यम्। तद्व्याचष्टे---मन्यतेस्तूत्तमःस्यादिति।"युष्मद्युपपदे" इति शेषः।

पूर्वसूत्रात्तदनुवृत्तेः। स चेति। सः = मन्यतेरुत्तमपुरुषः, द्वित्वबहुत्वयोरपि एकवचनं लभत इत्यर्थः। मद्यमोत्तमयोव्र्यत्यासार्थमिदम्। एतत्सर्वमनुवपदमेवोदाहरणे स्पष्टीभविष्यति।

---